RNI No:21138/1970

तिरुमलतिरुपतिदेवस्थानानि

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

November 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 08
November 2026, Price Rs.20/-
No. of pages-24



शुभां हिरण्यप्राकारां समुद्रतनयां जयाम्।
नमामि मङ्गलां देवीं सर्वोपद्रववारिणीम्।।









15.09.2026 तिथ्यारभ्य 23.09.2026 पर्यन्तं तिरुमलक्षेत्रे वार्षिकब्रह्मोत्सवाः अत्यन्तवैभवोपेततया प्रवृत्ताः भगवान् श्रीवेङ्कटेश्वरः विविधवाहनेषु आरुह्य भक्तेभ्यः दर्शनं ददौ। सूदूरप्रान्तेभ्यः आगताः भक्ताः अस्मिन् ब्रह्मोत्सवे भागं गृहीत्वा स्वामिनः आशीर्वादं प्रापुः।















गीतामृतम्

श्रीभगवानुवाच -

कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं नित्यंयज्ञे प्रतिष्ठितम्।।

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति।।

(भगवद्गीता ३.१५,१६.)

१५. भावः - कर्म ब्रह्मणः अर्थात् वेदादजायत। ब्रह्म अर्थात् वेदः अक्षरपरमात्मनः जातः। अतः सर्वव्यापकपरब्रह्मा यज्ञे प्रतिष्ठितः। अतः यज्ञः अवश्यमाचरणीयः।

विशेषांशः - यज्ञोनाम पञ्चयज्ञाः इति ज्ञातव्यः।

१६. भावः - हे पार्थ! अस्मिन् लोके यः उपर्युक्तप्रकारं जगच्चक्रं नानुसरति सः पापमयजीवनः इन्द्रियलोलः विषयासक्तः सन् व्यर्थं जीवति।

विशेषांशः - प्रजाभिवृद्धर्थं सत्कर्माचरणरहितः, पापजीवीति, व्यर्थं जीवीति ईश्वरनिर्मितजगच्चक्रस्य, प्रजाभिवृद्धेः असहाय्यकारी इन्द्रियेषु रममाणत्वात् आत्मारामः भवतीति ज्ञेयम्। सः न केवलं व्यर्थजीवी अत्मानर्थकारी च भवति।

सङ्कीर्तनम्

करुणानिधिं गदाधरं
शरणागतवत्सलं भजे
शुकवरं कौस्तुभाभरणं
आराधनप्रियमनेकदं
सकलरक्षकं जयाधिकं
सेवकपालकमेवं भजे
उरगशयनं महोज्ज्वलं तं
गरुडारूढं कमनीयं



परमोपदेशं परमं भव्यम्
हरिं दनुजभयदं भजे
लङ्काहरणं लक्ष्मीरमणं
पङ्कजभव भवप्रियं
वेङ्कटेशं वेदनिलयं
शुभाङ्गं लोकमयं भजे।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ४६)



बालदिनोत्सवः
‘‘बालाः क्रिडाभिरभिवर्धन्तु’’

सम्पादकीयम्

बाल्यं, कौमारं, यौवनं, वार्धक्यमिति चतुर्दशाः मानवस्य जीविते। बाल्यं प्रथमवयोदशा। क्रिडागान-आत्मीयतास्नेहामायकत्वानां पर्यायपदं बाल्यम्। अत्यन्तसुन्नितं स्वच्छं, अलौकिकानन्दानुभूतिप्रदं प्रकृति सिद्धं, अमूल्यं वरं बाल्यम्। मधुरातिमधुरजीवफलम्। बाल्यं भविष्यत्कालस्य मूलभूतम्। बाल्यदशा शारीरकमानसिकशक्तीनां अद्भुत विकासदशा। ऊहानां कल्पनानां निधिश्चिदेम्। आदौ पूर्णतया पराधारितदशातः प्ररब्धा बाल्यदशा क्रमशः सम्पूर्णस्वेच्छाकामुकदिङ्मुखमभिवर्धते। अत एव बालेभ्यः क्रिडितुं स्वेच्छ देया। बालैः क्रीडास्थलं गत्वा तत्र स्वोद्दिष्टक्रिडावस्तुभिः परिकरैः महता सन्तोषेण क्रीडागानानि कर्तव्यानि।क्रिडासमये मातुः, वा पितुः वा नियन्त्रणं न भवितव्यम्। बालानां स्वेच्छाक्रीडया तेषां स्वीयालोचनराक्तिः, ऊहाशक्तौ निर्णयस्वीकरणे आत्मविश्वासाभिवर्धने अभिवृद्धिः अवश्यं स्यात्। स्वेच्छापूरितक्रीडाः बालकानां आत्मविश्वासं आलोचनदृष्टिञ्च वर्धयन्ति। विज्ञानं वर्धायितुमुपकुर्वन्ति। बालानां स्वतन्त्रप्रयोगाय अवकाशसमयः कल्पनीयः। स्वीयविश्लोषणं कर्तुं प्रोत्साहः देयः। मानसिकस्थिरत्ववर्धनाय क्रीडाः उपकुर्वन्ति। बाल्यं नाम क्रीडापर्यायपदम्। क्रीडगानैः मानसिकविकासवर्धनाय समुचितसमयः बाल्यमेव।

अवधिरहिताः मानसिकानन्दवर्धकाः नियन्त्रणरहिताश्च क्रीडाः प्रायशः अत्यन्तप्रदर्शनस्वबले सर्वेषां विश्वास स्थानं वर्धयन्ति। अतः क्रीडाः अवधिरहिताः। क्रीडानां सृष्टौ सर्वेषां अत्यन्तसहजलक्षणम्। प्रकृतौ बालक्रीडाः एकभागत्वेन वर्तन्ते। बालानां प्रकृतौ लभ्यमानं प्रतिवस्तु क्रीडावस्तु एव। वृक्षाः तटाकानि, पुष्पाणि, सैकतानि, शिलादयः, बीजादयः बालक्रीडावस्तुषु अन्तर्भागाः। जातिसांस्कृतिकसम्पदि बालानां क्रीडाः अमूल्यभागाः भवन्ति।

कालावास्थानुरूपगानानि, क्रीडाः स्नेहाः स्वेच्छावर्तनानि बालशिक्षाग्रन्थान्तर्गत मयूरनेत्र तुल्यानि। तादृशचन्द्रवत् शीतलं सुखं भवति। अत एव बालानां क्रीडाः प्रधानाः भवन्ति। सर्वोऽपि प्रपञ्चः तेषां क्रीडास्थनमेव। प्रकृतौ समस्तवस्तूनि क्रीडावस्तून्येव। क्रीडनं, निद्रा, बाल्यसहजात सौन्दर्यान्येव। ‘‘बाल स्तावात् क्रीडासक्तः।’’ अनया दृष्ट्या बालेभ्यः स्वेच्छोत्साहोल्लासाभरतिःबहिः, प्रदेशेषु क्रीडितुं आरोग्येन वर्धयितुं अवकाशः सर्वैः मातृभिः पितृभिः देयः।

।।बालदिनोत्सवशुभाकांक्षाः।।



स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर आश्वयुजबहुलसप्तमी आदिवारादारभ्य-
कार्तिकबहुलसप्तमी-सोमवारपर्यन्तम् - २०२६

वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो न भूतो न भविष्यति ॥

तिरुमलतिरुपतिदेवस्थानम्

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः(F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्,M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः, ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— प्रधानसम्पादकः

नवम्बर् - २०२६

सम्पुटिः-१३ सञ्चिका-०८

नरकचतुर्दशी - दीपावलिः - डा.पि.माधवी	06
याज्ञवल्क्यमहर्षि जयन्ती - आचार्य जि.पद्मनाभम्	08
मनवालमहामुन्युत्सवाः - डा. जि.चन्द्रशेखर्	15
नागचतुथी नागुलचविति - डा.वि.माधवरेड्डि	17
अत्रिमहर्षिः वर्षतिरुनक्षत्रम् - डा. के.कोटेश्वरय्य	19
कलिबाधानिवारणार्थम् (चित्रकथा) - डा. के.सूर्यनारायणरेड्डि	20
द्वादशराशीनां फलानि - आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः	22

मुखचित्रम् - श्रीधनलक्ष्मीमाता (चित्रपटम्)।
अन्तिमपुटचित्रम्:- श्रीमहाविष्णुः (चित्रपटम्)।

सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

अस्तमयेऽपि सतामुचितं खलु उच्चतरमेव पदम्।



नरकचतुर्दशी दीपावलिः

(08-11-2026)

- डा. पि.माधवी
चरवाणी - ८५१९८०४७८४

दीपमालिकाभिः लक्ष्मीदेव्यै नीराजनं दीयते इति कारणात् दिनस्यास्य दीपावळिः इति नाम आगतम्। नरकलोकवासिभ्यः दीपावलिः कल्प्यत इति दीपावळिनामागतमितिकेचित्। बलिचक्रवर्तिनं विष्णुः पाताललोकं प्रापयामासेति कारणात् इदं महोत्सवदिनं पुरस्कृत्य दीपावळिः नाम इति केचित्। श्रीरामपट्टाभिषेकदिनत्वात् दीपावळिनामेति केचित्। विक्रमशकस्थापकस्य विक्रमार्कचक्रवर्तिनः पाट्टाभिषिक्तदिनत्वात् दीपावळिदिनमिति केचित्। लक्ष्मीः भूलोकमागत्य सर्वगृहेषु परिभ्रमतीति प्रजाविश्वासात् गृहाणि शुचितया कर्तव्यानीति वदन्ति।

महाराष्ट्रे पञ्चदिनपर्वदिनमिदम्। बलिना कारागारस्थदेवताः लक्ष्म्या सह क्षीरसागरस्थान् कृतवान् विष्णुरिति एतदानन्ददिनस्मारकतया दीपावळिपर्वदिनं निर्वाह्यते इति लक्ष्मीप्रीतिकरदिनमिदमिति लक्ष्मीपूजा अस्मिन्दिने प्रधानभूता इति केषञ्चिन्मतम्। महालयपक्षे स्वर्गादागतपितृदेवताः भूलोकात् पुनः पितृलोकं गच्छन्तीति तेभ्यः कान्तिप्रदर्शनार्थं नरलोकवासिभिः हस्तेन दीपानवलम्ब्य आकाशदर्शनं कर्तव्यमिति शास्त्रवचनम्। तमिलदेशे नरकासुरपुत्रभगदत्तमूलतया दीपावळिपर्वदिनभागवतमिति केचिद्वदन्ति। भूदेवीपुत्रः नरकासुरः। नरकासुरार्थं भूदेवी स्वभर्तारं विष्णुमूर्तिं प्रार्थयित्वा वैष्णवास्त्रमानयामास। भूमाता नरकमरणानन्तरं तद्वैष्णवास्त्रं पुत्राय भगदत्ताय ददौ। भारतयुद्धे भगदत्तः कौरवपक्षे आसीत्। तद्युद्धे वैष्णवास्त्रं सः भगदत्तः अर्जुनोपरि प्रयुयोज। कृष्णः तदा अर्जुनं रक्षितुं दक्षिणहस्तं त्रिर्यक्तया प्रसार्य तद्वैष्णवास्त्रं निस्तेजः चकार। तदा वैष्णवास्त्रं कृष्णकण्ठप्रदेशभ्रमणं कृत्वा शीतलं भूत्वा नक्षत्रवत् पुष्पावळिरिव वनमाला भूत्वा कृष्णकण्ठे अपतत्। एतत्स्फुरणार्थं अग्निकणाः श्रीकृष्णकण्ठं परिभ्रमन्तीति वदन्ति। दीपावळिदीपप्रज्वलनात् कीटादयः नश्यन्ति।

नरकचतुर्दशी इत्युक्ते नरकात् तारण चतुर्दशीति शास्त्रात् ज्ञायते। निर्णयसिन्धुग्रन्थे आश्वयुजकृष्णपक्षस्य चतुर्दश्यां विधूदये।

तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा।।

इत्युक्तत्वात् तिलतैलेन अभ्यङ्गस्नानं कर्तव्यमिति पद्मपुराणवचनम्।

नरकासुरः - राक्षसवीरजन्मवृत्तान्तः - हिरण्याक्षः समुद्रस्नानं कुर्वन् स्वबलहस्ताभ्यां तरङ्गान् बाधयति स्म। तदा वरुणः अस्य अकृत्यानि महाविष्णोः निवेदयामास। महाविष्णुः एनं हन्तुं प्रस्थितः। हिरण्याक्षः वराहरूपेण भूमिं विषाणैः उत्क्षिप्य पातालं जगाम। विषाणस्पर्शेण भूमाता एकवीरस्य जन्म ददौ। स एव नरकासुरः। तदा भूमाता तं महाविष्णुसकाशं नीत्वा तस्य आशीः वक्तुं प्रार्थयामास। विष्णुः नारायणास्त्रं तस्यै दत्वा मत्तः नरकस्य मरणं न भवेदित्युवाच।

नरकासुरपूर्वजन्म - बहुसहस्रवर्षपूर्वं १६००० सुतानां पिता एकः राजा आसीत्। अस्य भवने सुताः सर्वे वसन्ति स्म।

स्वाधीनं मातरं पितरंगुरुमतिक्रम्य अस्वाधीनं दैवंकथमाराध्यते।

श्रीमहा विष्णुः मुनिरूपे तत्रगतः। १६००० सुताः तं विष्णुं परिवृताः आसन्। राजा कुपितः तान् शशाप। पुनः सुतानां प्रार्थनया आगामिजन्मनि यूयं श्रीमहाविष्णोः भार्याः भविष्यन्तीति शापविमोचनमुवाच। आगामिजन्मनि एताः भिन्नभिन्नदेशेषु जाताः। नरकासुरः एताः सर्वाः कारागारबद्धाश्चकार (भागवतम्)।

नरकासुरः प्राग्ज्योतिषं राजधानीं कृत्वा असुरचक्रवर्तित्वेन बहुकालपर्यन्तं राज्यं पालयति स्म। सः त्वष्टुपुत्रिकां कशेरां मानभङ्गचकार। भूलोके देवलोके १६१०० कन्याः बध्वा मणिपर्वतकारागारे निवेशयामास। हयग्रीव निशुण्ड, पञ्चनदमुरानमकराक्षसान् कारागारद्वारस्य रक्षकत्वेन नियुयोज। नरकासुरस्य १० पुत्राः राज्यरक्षणं कुर्वन्तिस्म। नरकासुरः १६००० रज्जुभिः राज्यस्य अवधीन् विहितवान्। सुग्रीवः प्राग्ज्योतिषे सीतान्वेषणाय प्रत्येकसूचनाश्चकार।

नरकासुरवधम् - नरकासुरः स्वशक्त्या लोकत्रयं बाधतेस्म। इन्द्रस्य मातुः अदितेः कर्णकुण्डले, इन्द्रस्य क्षत्रञ्च अपहृतवान्। इन्द्रेण द्वारकां गत्वा श्रीकृष्णस्य स्वबाधानिवेदनात् श्रीकृष्णः सत्यभामासहितः गरुत्मद्वाहने आगतः राक्षसान् हत्वा ततः नरकमपिहत्वा अदितेः कर्णकुण्डले इन्द्रस्य क्षत्रञ्च पत्यर्पयित्वा नारायणास्त्रं नरकपुत्रस्य भगदत्तस्य ददौ। (भागवतम्)

आश्वयुजबहुलचतुर्दशी - आश्वयुजबहुलचतुर्दश्यां अभ्यङ्गस्नानात् दीपदानात् यमतर्पणात् मानवाः नरकदूराः भवेयुः।

अस्यां चतुर्दश्यामेव नरकविमुक्तयर्थं यममुद्दिश्य दीपदानं कर्तव्यमिति व्रतचूडामणिवचनम्। आश्वयुजबहुलचतुर्दश्यां नरकलोकवासिभ्यः दीपप्रज्वलनात् पितृदेवताः नरकलोकवासिभ्यः दीपप्रज्वलनात् पितृदेवताः सर्वाः नरकलोकात् स्वर्गं प्राप्नुयुरिति शास्त्रवचनम्।

चतुर्दश्यां ये दीपान्नरकाय ददतिच तेषां पितृगणास्सर्वे नरकात् स्वर्गमाप्नुयुः इति शास्त्रवचनम्।

श्रीकृष्णेन नरकसंहारानन्तरं सन्तोषेण दीपमालिकाः प्रज्वालयामासुः। तस्मात् कालात् दीपावळिपर्वदिनं प्रवर्तते। विद्वान् काव्यतीर्थ मुद्दुलपल्लि वेङ्कटसुब्रह्मण्यशास्त्री आन्ध्रपत्रिकायां एवं लिखति - नरकचतुर्दश्याः नरकासुरस्य सम्बन्धो नास्ति, नरकं नाम दुर्गतेः तरणमिति "निर्णयसिन्धौ" प्रोक्तम्। नरकभीतैः आश्वयुजशुद्ध चतुर्दश्यां चन्द्रोदयकाले तिलतैलेन अभ्यङ्गस्नानं कर्तव्यमिति पद्मपुराणवचनम्। नरकशब्दस्य नरकासुरार्थः न भवतीति नरकमेवेति ज्ञातव्यम्। विद्वान् वेदं सत्यनारायणशास्त्री नरकनाम जनकनाम इव वंशबिरुदम्। जन नर शब्दौ समानार्थकौ। नरशब्दस्य कप्रत्यययोगे नरकमिति शब्दः व्युत्पन्नमिति कथयति। हरगौरीसंवादग्रन्थे कामरूपदेशपालकाः २४२५ राजानः नरकवंशीयाः इति प्रोक्तम्। कालिकापुराणे नरकः कश्चित् युगान्तं राज्यमपालयदिति प्रोक्तम्। नरकः २८ त्रेतायुगे जातः, द्वापरान्ते अम्रियत इति रामावतारान्ते कृष्णेन मरणमावापेति आधाराः वर्तन्ते इत्युक्तम्। जनकराजस्य भूमिनाम्नचासमागमात् जातः अनौरसपुत्रः नरकः कामरूपपालकः घटकनामककिराताधिपतिं निर्जित्य तद्देशप्रभुत्वेन अभिषिक्तः नरकवंशस्य मूलपुरुषः अभूदिति। नरकवंशमूलपुरुषः विदर्भेश्वरपुत्रीं मायादेवीं पर्यणैषीदिति कालिकापुराणवचनम्।

नरकोऽपि तदा धीमान् वेदशास्त्रार्थपारगः, ब्राह्मण्यो नीतिकुशलो, वदान्याः दानतत्परः सुचिरं राज्यमकरोच्चक्रवत् त्रिदशालये।। अतः नरकः वैदिकमतानुष्ठानपरः। नरकपदं वंशनाम एव इति ज्ञेयम्।

भारतदेशे सर्वत्र दीपावळिपर्वदिनं पुरुस्कृत्य उद्योगिनां विद्यालयानां विरामदिनमिदम्। भारतदेशे महावैभवोपेततया पर्वदिनमिदमाचरन्ति। लक्षाधिकरुप्याकाणि आधुनिक दीपप्रज्वलनार्थं टपासूनाम्ना सानन्दं व्ययीकुर्वन्ति।







याज्ञवल्क्यमहर्षि जयन्ती

(19-11-2026)

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

गङ्गानदीतीरे चमत्कारपुरे सकलसद्गुणसम्पन्नः ब्राह्मणश्रेष्ठः आसीत्। तेन देवेन यज्ञवेदस्य सलक्षणाधीतत्वात् यज्ञवल्क्यः इति निरन्तरान्नप्रदानत्वात् वाजसनः इति, ब्रह्मवेदान् शिष्येभ्यः बोधन - वृत्तित्वात् ब्रह्मरातः इति देववरप्रसादात् जातत्वात् देवरातः इति सार्थकनामधेयः आसीत्। सुनन्दां परिणीय पुत्रजननार्थं देवदेवमधिकृत्य तपसा प्रत्यक्षीकृतं कृत्वा ब्रह्मविद्याव्यापनार्थं देवदेवमेव पुत्रत्वेन जननाय वरं सम्पादयामास।

कार्तिकशुद्धद्वादशीभानुवासरे धनुर्लग्ने सुनन्दा पुत्रमसूत। तस्य रूपरेखामनुसृत्य जातं पुत्रं भगवानेवेति प्रजाः मेनिरे। जातकर्मानन्तरं पितरमनुसृत्य याज्ञवलक्यः वाजसनिः ब्राह्मरातः, देवरातः याज्ञवलक्यः इति आहूयते स्म।

बाल्यदशा - पञ्चवर्षे अक्षराभ्यासं अष्टमवर्षे उपनयनं प्राप्य पित्रनुमत्या बाष्कलसकाशे ऋग्वेदं जैमिनीसकशे सामवेदं आरूणिनामान्तरोद्दालकसकाशे अधर्ववेदं अभ्यस्य पितुः आनन्दजनकः बभूव। पिता भगवानेव स्वपुत्रः तं तदनन्तरविद्याभ्यासार्थं वैश्म्पायनस्य समर्पयामास।

याज्ञवल्क्यस्य गुरुभक्तिः - कृष्णद्वैपायनेन नियुक्तः वैशम्पायनमहर्षिः याज्ञवल्क्यस्य मुखलक्षणानि परिशील्य उत्तमशिष्यो भवेदिति तस्य शिष्यत्वमङ्गीचकार। पिता देवरातः पुत्रमुद्दिश्य माता, पिता गुरुः सर्वमयमेव इति मत्वा दुरहङ्कारदुर्मदादीन् परित्यज्य अस्य शुश्रूषया सद्विद्याानवद्यः भव इति आशीः प्रयुज्य वैशम्पायनमरणानन्तरं स्वपुरञ्गाम। याज्ञवल्क्यः गुरुसेवातत्परः यजुर्वेदमभ्यसन् गुरुपुत्रेभ्यः प्राक् निद्रोत्थाय नित्यकृत्यानि निर्वहन् गुर्वाज्ञया गुरुविधीत समस्तकृत्यानि निर्वहन् गुरुशुश्रूषामाहात्म्यात् अनतिकाले सन्तुष्टगुरोः परमार्थरहस्यानि सर्वाणि बुद्धिशुद्धि संसिदिषु सर्वानतिक्रम्य अनन्तविद्याविभवः आसीत्।

याज्ञवल्क्यस्य विद्यामदः - याज्ञवल्क्यः यजुर्वेदाभ्यासानन्तरं सर्वविद्यारहस्येषु चतुरः बभूव। गुरुशुश्रूषाभाग्यतया ब्रह्मतेजोदीप्तः सत्त्वगुणसम्पन्नः बभूव। विधिवशात् याज्ञवल्क्यः सत्त्विकाहङ्कारविद्यामदः आसीत्। गुरुः तस्य विद्याहङ्कारं ज्ञात्वापि क्रमशः तस्य मदः नश्येदित्यमन्यत।

कदाचित् गुरोरागतं ब्रह्महत्यादोषं सप्तदिनेषु नाशयिष्यामीति गुरोः शिष्यसमक्षे अवदत्। असूयाग्रस्ताः शिष्याः एनं विषयं गुरोः निवादयामासुः। गुरुभक्त विधेयं याज्ञवल्क्यं तस्य विद्यामदं ज्ञात्वापि उपेक्षतेऽस्म।

वैशम्पायनेन याज्ञवल्क्यस्य शिक्षा - कदाचिद्वैशम्पायनः अविनीतं स्वजामातरं क्रोधात् पादाहतञ्चकार। परन्तु पश्चात् ब्राह्मणे पादाहतिः ब्रह्महत्याघातसममिति निश्चीय स्वशिष्यानाहूय अत्मनि प्राप्तं ब्रह्महत्यापापं व्रतादीनाचर्य परिहरत इत्यावोचत्। तदा याज्ञवल्क्यः अहमेकः एव तवागतं ब्रह्महत्यादोषं परिहरिष्यामि एते तव शिष्याः अन्ये ब्रह्महत्यापातकपरिहारज्ञानरहिताः इति गर्वादवोचत्। तदा कृद्धः वैशम्पायनगुरुः ममाप्यज्ञातशक्तिः तव अस्ति इति भ्रमेण एतान् सहचर शिष्यान् निन्दसि इति याज्ञवल्क्यमुद्दिश्य यस्मात् तव गर्वशक्तिरागतं तं वेदं मदधीतं अत्रैव वमित्वा शीघ्रं गच्छ, गुरुद्रोही विप्रनिन्दकः इति मन्मुखं पुनः न पश्येति कठिनमवोचत्। ततस्तदा याज्ञवल्क्यः गुरुपादपतितः महात्मन्। गाढानुरागात् त्वयि तथा उक्तोऽस्मि, नाहं दुष्टः ब्राह्मणावमानकारी वात्सल्यदृष्ट्या मयि करुणां प्रदर्शय इति दीनवदनः प्रोवाच। तदापि गुरुः अशान्तः आसीत्। तदा याज्ञवल्क्यः हितं वा अहितं वा भवतु तव आज्ञां शिरसा वहामीति एतद्रक्तरूपेण त्वत्तः प्राप्तं यजुर्वेदंवमामि,

अहो सदाक्षिण्यस्य जनस्य परिजनो सदाक्षिण्यः एव भवति।

सप्तदिनेषु तवप्राप्तं ब्रह्महत्यादोषं परिहरिष्यामीति गुरोरधीतवेदान् रूधिररूपेण वमित्वा निजतपोबलात् गुरोः संक्रमितं ब्रह्महत्यासमदोषं पश्हितश्चकार। वैशम्पयनवमितयजुर्वेदः रक्तमांसरूपे अधः पतनात् तदधः पतितान् रक्तमांसान् तित्तिरितक्षिणः भुक्त्वा ततः उच्चरन्तः तित्तिरिनामकवेदशाखाः प्रवर्तयामासुः। ताः एव तैत्तरीयोपनिषदः इति प्रख्याताः।

याज्ञवल्क्येन सूर्याराधनया शुक्लयजुर्वेदाद्यभ्यासः - यज्ञवल्क्यः गुरुभक्तिमूलात् दोषरहितः प्राणायामसहितः सूर्यदेवमाराधयामास। तस्य व्रतनिष्ठायाः तपोऽनवद्यतायाः सकलवेदमयः भास्करः कारुण्येन वाजिरूपेण प्रत्यक्षीभूतः वरंस्वीकुरु इत्यवोचत्। तदा सः निजगुरोः जातदुःस्थितिमुवाच, तदा सूर्यः तव गुरोरप्यज्ञातं शुक्लयजुर्वेदं बोधयित्वा अन्यसमस्तविद्याः सरस्वतीमाराध्यप्राप्नुहीत्यवोचत्। तदा याज्ञवल्क्यः सरस्वतीमधिकृत्य तीव्रं तपः आचर्य प्रत्यक्षीभूतायाः तस्याः करुणया सकलविद्यापारङ्गतः तां कीर्तयित्वा तदाशीरवाप।

एवममानुषविद्यानिधिः याज्ञवल्क्यः स्वाधीतशुक्लयजुर्वेदं दशवाजिशाखाः कृत्वा स्वशिष्यद्वारा विश्वव्याप्तश्चकार। एतच्छाखीयाः काण्वशाखीयाः इत्युच्यन्ते।

याज्ञवल्क्यात् शाकल्यमुनिपराजयः - यागं कुर्वता जनकमहर्षिणा आहूतः याज्ञवल्क्यः ब्राह्मणश्रेष्ठाय प्रकटितं धनराशिं वादे बहुविप्रान् पराजित्य स्वशिष्यद्वारा स्वगृहं प्रापयामास। ततः शाकल्यमुनिः शास्त्रवादाय आगतः यज्ञवल्क्यं सहस्रप्रश्नानपृच्छत्। याज्ञवल्क्यः तेभ्यः प्रश्नेभ्यः युक्तियुक्तं समाधानमवोचत्। ततः यज्ञवल्क्यपृष्टस्य एकस्य प्रश्नस्यापि समाधानं वक्तुमसमर्थः वादनियमानुसारं स्वच्छन्द मरणमवाप। तस्मात्कालादारभ्यः जनकः याज्ञवल्क्यं सम्पूज्य तस्मादनेकाध्यात्मिकविषयेषु समुचितसमाधानानि जानातिस्म। शाकल्यमुनिमपि करुणया तपोबलेन पुनरुज्जीवितं चकार।

याज्ञवल्क्यात् जनकेन आध्यात्मिकविषय-ज्ञानप्राप्तिः - जनकः याज्ञवल्क्यात् इन्द्रियाणि अव्यक्तं, ब्रह्म, परमं भूतसर्गप्रलयाः तत्कालसंख्याः इत्यादीन् सम्यक् ज्ञात्वा अध्यात्म अधिभूत - अधिदैवतप्रकारानपृच्छत्। तदा याज्ञवल्क्यः एवं समादधौ - पादौ, पायुः उपस्था, पाणिः, वाक् इत्येते अध्यात्मास्वरूपाः। तेभ्यः क्रमशः गन्तव्यं, निसर्गः आनन्दः कर्तव्यम् वक्तव्यमित्येते अधिभूताः। तेभ्यः क्रमशः विष्णुः, सूर्यः, प्रजापतयः इन्द्रः, अग्निः अधिदैवतानि। चक्षुः जिह्वा, घ्राणः, त्वक् श्रोत्रमित्येते अध्यात्मस्वरूपाः। एतेभ्यः रूप रस गन्ध स्पर्श शब्दाः अधिभूताः। सूर्यः जलं, भूमिः, वायुः दिशः, क्रमशः अधिदैवतानि। मनः अध्यात्मा तस्य अधिभूतः मन्तव्यः। चन्द्रः अधिदैवतम् बुद्धिः अध्यात्मा। तस्य अधिभूतम् बोद्धव्यम्। क्षेत्रज्ञः अधिदैवतम्। अहङ्कारः अध्यात्मा तस्य अभिमानः अधिभूतम्। रुद्रः अधिदैवतम् चित्तमध्यात्मा। तस्य अधिभूतः चेतयितव्यः (कृतम्) ब्रह्म अधिदैवतम्। ततः मनोनिर्विकाराय प्रकृतिपुरुषविधिः ज्ञातव्यः।

एकदीपात् अनेकदीपव्याप्तिरिव प्रकृतिः बहुगुणरूपाणि प्राप्नोति। गुणत्रये सत्त्वगुणाः - सन्तोषः आनन्दः, आरोग्यम् अक्रोधः आर्जवम्, शुद्धिः प्रकाशता, सुस्थिरत्वम्, अहिंसा, निर्मलश्रद्धा, विनीतिः, लज्जा, सत्यम्, शौचम् समता, आचाराः, अकार्पण्यम् अपैशुन्यम्, अकामवृत्तिः इति। रजोगुणाः - विग्रहः, दर्पः अभिमानः कामः, क्रोधः, मात्सर्यम्, करुणाराहित्यम् भोगकांक्षा, अहङ्कारः, उम्पलिका इति, तमोगुणाः - अप्रकाशः, मोहः, बहुतराशनम्, वादः प्रमादः मौर्ख्यम्, माद्यम्, मरणं दुःखम्। प्रकृतिः एतैः गुणैः स्वस्वभावीकरणम्। अन्तरात्मनः अनेक विकृतीः सम्पादनम्। पुरुषः चैतन्यः, प्रकृतिः जडम्। अतः आत्मना आत्मज्ञानं सम्पादितश्चेत् अव्यक्तात् दूरीभूत्वा अजरामरशाश्वतविगताञ्जन विमलाच्युतपदं प्राप्य निजप्रकाशस्थिरतया अक्षरोभवेत्।

पुरुषः प्रकृतौ प्रकृतिः पुरुषे तिष्ठति। तथापि पुरुषः जलमत्स्यानां उदुम्बारमशकानां सङ्गमः इव विकृतिं न प्राप्स्यति। अन्तरात्मा प्रकृतिं प्राप्तोऽपि जलेस्थित्वापि जलेन अननुलिप्तः इव विकारं न प्राप्नोति। अयमेव सांख्यानुभवः। सांख्यम्, भोगः भिन्नौ न। द्वावप्येकः एव। प्राणायामात् चित्तस्य, तनोः, शुद्धताप्राप्तिः, अतः इन्द्रियाणि मनसि मनः अहङ्कारे अहङ्कारः बुद्धौ, बुद्धिः प्रकृतौमिश्रीभावात् ध्यानतत्परता सिद्ध्यति। ध्यानतत्परः आत्मानित्यनन्दसत्यशुद्धमयशिवं प्राप्नोति। एवं याज्ञवल्क्यः जनकाय अनेकविषयान् बोधयामास।

विश्ववसाय याज्ञवल्क्योक्त तत्त्वप्रकारः - कदाचिद्विश्वा वसनामकगन्धर्वः याज्ञवल्क्यं समीप्य तेन सत्कृतः विश्वाविश्वौ + मित्रावरुणौ ज्ञानगेयौ। तपोतपोसूर्यातिसूर्यौ, विद्याविद्ये, वेद्यावेद्यौ चलाचलौ इत्येतानधिकृत्य वक्तव्यमिति प्रार्थितः। याज्ञवल्क्यः सावधानं श्रुणु इत्येवमवोचत् - विश्वं नाम भूतभव्यभवत्कर व्याक्ताव्यक्तनामक प्रकृतिरेव। निर्गुणः पुरुषः

अविश्वम्। मित्राविरुणौ पुरुष प्रकृती, ज्ञानज्ञेयौ तपोऽतपे। सूर्यातिसूर्यावपि प्रकृतिपुरुषावेवा विद्याविद्यावेद्यावेद्यचलाचल नामकशब्दाः प्रकृतिपुरुषावेव। एते क्रमशः पुरुषस्य प्रकृतेश्च वाचकाः।

वेदार्थचिन्तनायां क्षराक्षरौ ज्ञात्वा क्षरं परित्यज्य अक्षरं स्वीकृत्य पञ्चविंशाख्यतत्परतायां विद्यमानपुरुषस्य केवलत्वं लभ्यते। तस्मात् सः षड्विंशदर्शनंप्राप्य तन्मयतया पुरुषोत्तमो भवति। पुरुषोत्तमः इति षड्विंशकः इति परमेश्वरः इति परस्यैव नामानि। तत्परमेव निरञ्जनानन्दबोधतत्त्वम्। प्रकृतिः पुरुषं न पश्यति। पुरुषः प्रकृतिं पश्यतीति कारणात् परं न पश्यति। परमस्तु प्रकृतिपुरुषौ पश्यति। स्नेहसहवासमूलात् सम्मोहजननात् कालसमूद्रे निमज्जन् गाढाहङ्कारममत्व-ईहामभिवर्धयतीति कारणात् प्रकृत्या पुरुषः ऐक्यं प्राप्नोति। तथा न चेत् प्रकृतिपुरुषयोः भिन्नत्वं ज्ञातं भवति। प्रकृतिं परित्यज्य पुरुषः विवेकदृढत्वेन पञ्चविंशोभूत्वा षड्विंशं निस्संशयं लभेत् अपुनरावृत्त - पदं तदेव। एवं याज्ञवल्क्येन बोधात् विश्वावसुः सन्तुष्टः पथ्यापथ्यं ज्ञातोऽस्मीति याज्ञवल्क्यं संयमिलोक ब्रह्मालोक सुरलोकेषु प्रख्यातप्रज्ञानसम्भावनीयः इति कीर्तयित्वा सभक्तिकप्रदक्षिणप्रणामान् समर्प्य निजस्थानञ्जगाम।

याज्ञवल्क्यस्य विवाहवृत्तान्तः - मिथिलानगरारण्यवासिनः क्रतोः निजभार्यायाः कात्यायनी नामक पुत्रिका दिव्यलक्षणशोभितासीत्। याज्ञवल्क्यः क्रतुना प्रर्थितः तत्पुत्रिकां कात्यायनीं सकलऋषिगणसमेतः पर्यणैषीत्। पश्चात् मित्रनामक सद्ब्राह्मणस्य मैत्रीयीनामकपुत्री ब्रह्मविद्यागोष्ठीतत्परा बन्धुभूतायाः योगीश्वर्याः गार्ग्याः समीपे शिक्षां प्राप्नोतिस्म। पश्चात् जनकराजसभायां अखण्डपण्डितान् पराजितान् कृत्वा गर्ग्या वादे जयं प्राप्तं याज्ञवल्क्यमेव विवाहे परिणेष्यामीति कृतनिश्चया पितरमवोचत्। पिता गार्गीमिमं विषयं प्रोवाच। गार्गी सन्तुष्टा इमां कात्यायन्याः समर्पयामास। क्रमशः मैत्रीयीकात्यायन्योः परस्परस्नेहयक्ते आस्ताम्। एतत्समयं निरीक्ष्य गर्गीकात्यायन्यै मैत्रीय्याः अभिलाषं व्यक्तीचकार। कात्यायनी ब्रह्मानन्देन भर्तुरनुमतिं प्राप्य स्वभर्त्रामैत्रीयीविवाहं स्वयं कारयामास। मैत्रीयीभर्त्रा निरन्तरब्रह्मविद्यागोष्ठीषु भागं गृहीत्वा तत्सपर्याः करोति स्म। क्रमशः याज्ञवल्क्यस्य कात्यायन्यां चन्द्रकान्त महामेध विजयनामक त्रयः पुत्राः उद्भूताः।

याज्ञवल्क्यस्य योगीन्द्रपट्टाभिषेकः - सर्वे महर्षयः परमयोगरहस्यानि याज्ञवल्क्यात् ज्ञात्वा तदधिकः योगरहस्यज्ञाता नास्तीति याज्ञवल्क्यं माघशुद्धपूर्णिमायां योगीन्द्रपट्टाभिषिक्तं चक्रुः। याज्ञवल्क्येन ऋषयः बोधिताः विषयाः एव ''योगयाज्ञवल्क्यम्'' नाम्ना द्वादशाध्यायात्मना विश्वविख्यातग्रन्थः इति लोकाय आगतः।

याज्ञवल्क्येन तृतीयाश्रमस्वीकारः - याज्ञवल्क्यः सन्यासाश्रमस्वीकारसमये कात्यायनीं मैत्रीयीमाहूय स्वार्जितसमस्तैश्वर्याणि स्वीकर्तुमवोचत्। ते अजरामरत्वमोक्ष मार्गमेव बोधयतमिति प्रार्थयामासतुः। तदा सः ''भर्ता भार्यायाः प्रियः न भवति आत्मार्थं प्रियः भवतीति, एवं पुत्रमित्रादिभ्यः न केवलं समस्तस्यापि आत्माप्रयोजनार्थमेव भर्ता प्रियं भवतीति उक्त्वा आत्मा द्रष्टव्यः श्रोतव्यः मन्तव्यः, निधिध्यासितव्यः इति तस्मात् ज्ञानात् समस्त ज्ञानं स्यादिति अद्वितीयपरमात्मा एव सकलकारणमिति वेदशास्त्रदीनि परमात्मनः निश्वासा एव। आत्मा भूतेभ्यः उद्भूय तानुसृत्य मृत्युं प्राप्नोति। ज्ञानोदयात् पूर्वं विशेषज्ञानं प्राप्य मरणानन्तरं भेदविषयिक सूचनाभावात् ब्रह्ममाता भवति। अज्ञानात् आत्मनः देहेन्द्रियात्मक जीवभावः जातः। सः भावः ज्ञानाविर्भावात् नष्टः भवति। विज्ञान घनस्वरूपात्मा नाशरहितः इदं न इदं न इति सर्वनिषेधैः निश्चितात्मा आकाररहितः, अन्यसङ्गदुःखबाधारहितः। अतः आत्मना आत्मा ज्ञातव्यः। इदमेवामृतत्त्वमिति बोधयित्वा तान् तोषयित्वा स्वयं सन्न्यस्य नित्यानन्दः बभूव।

याज्ञवल्क्यस्मृतिः - याज्ञवल्क्यः मिथिलानगरस्थः वर्णाश्रमधर्मविशदीकरणाय ऋषिभिः प्रार्थितः आचारव्यवहारप्रायश्चित्तात्मना त्रिकाण्डपूर्णं स्मृतिग्रन्थमुपदिदेश। प्रथमकण्डेचतुर्ददशविद्याः परिषत् संस्काराः, सपिण्डविवाहः, स्नातकविधयः, पुरोहितधर्माः इत्यादयः सन्ति। द्वितीयकाण्डे न्यायस्थानादिकम् स्त्रीधनविषयादयः सन्ति तृतीयकण्डे अपरकर्म, अशौचशुद्धिः, यति धर्माः, मोक्षधर्माः, सत्वरजस्तयोगुणदोषाः यमनियमाः प्रायश्चित्तविधयः दृश्यन्ते।

योगयाज्ञवल्क्यम् - योगयोगाङ्गोपाङ्गनि द्वादशाध्याये सन्ति। स्वेन गार्ग्या सम्भाषणसारः एव अत्र विद्यते इति ज्ञायते। योगशास्त्रं आत्मना ब्रह्मसकाशदधीतमिति याज्ञवल्क्यः स्वयमेवावोचत्।

सकर्मणामनुष्ठानात् सत्यधर्मनिदर्शनात्।
वेदान्तानां परिज्ञानात् गृहस्थोऽपि विमुच्यते।।
ज्ञानकर्मसमायोगात् परमाप्नोतिपूरुषः।
पृथग्भावो न सिद्ध्येत उभे तस्मात् समाश्रयेत्।।

श्रीमहालक्ष्मीचतुर्विंशतिनामावळिः



तिरुमलक्षेत्रे आनन्दलियस्थश्रीवेङ्कटेश्वरस्वामिनः मूलविराण्मूर्तेः प्रत्यहं वारत्रयं अर्चनं प्रवर्तते। उषःकाले तोमालसेवानन्तरं अष्टोत्तरसहस्र (१००८) नामभिः सहस्रनामार्चनं प्रवर्तते। पश्चात् मध्याह्ने पुनः रात्रौ अष्टोत्तर (१०८) शतनामभिः अर्चनं प्रवर्तते। उपर्युक्त अर्चनानन्तरं श्रीवेङ्कटेश्वरस्वामिवक्षःस्थले विद्यमानमहालक्ष्मीमातुः वराहपुराणस्थ चतुर्विंशति (२४) नामाभिः अर्चनं प्रवर्तते। तिरुचानूरुक्षेत्रेऽपि एतन्नामभिः अर्चनं प्रवर्तते।

''सप्तगिरि'' पाठकेभ्यः मातुः चतुर्विंशतिनामानि आगामितिरुचानूरु-श्रीपद्मावतीमातुः ब्रह्मोत्सवसन्दर्भं पुरस्कृत्य आदावेव चतुर्विंशतिनामानि समर्प्यन्ते।

श्रीवेङ्कटेशमहिषीमहालक्षामी प्रीत्यर्थं श्रीवेङ्कटेशमहिषीमहालक्ष्मी-चतुर्विंशतिनामभिः श्रीवेङ्कटेश महिषीमहालक्ष्म्यर्चनं करिष्ये। अस्य श्रीमहलक्ष्मीचतुर्विंशतिनाममन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुपूछन्दः, श्रीमहालक्ष्मी देवता, श्रीवेङ्कटेशमहिषीमहालक्ष्मी प्रीत्यर्थंजपे विनियोगः।

ध्यानम् -

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं।
तद्वक्षःस्थल नित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम्।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थांश्रियं।
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम्।।

१. ओं श्रियै नमः।
२. ओं लोकधात्र्यै नमः।
३. ओं ब्रह्ममात्रे नमः।
४. ओं पद्मनेत्रायै नमः।
५. ओं पद्ममुख्यै नमः।
६. ओं प्रसन्नमुखपद्मायै नमः।
७. ओं पद्मकान्त्यै नमः।
८. ओं बिल्ववनस्थायै नमः।
९. ओं विष्णुपत्न्यै नमः।
१०. ओं विचित्रक्षौमधारिण्यै नमः।
११. ओं पृथुश्रोण्यै नमः।
१२. ओं पक्वबिल्वफलापीनतुङ्गस्तन्यै नमः।
१३. ओं सुरक्त पद्मपत्राभकरपादतलायै नमः।
१४. ओं शुभायै नमः।
१५. ओं सरत्नाङ्गदकेयूरकाञ्चीनूपुरशोभितायै नमः।
१६. ओं यक्षकर्दमसंलिप्तसर्वाङ्गायै (सर्वाङ्गयै) नमः।
१७. ओं कटकोज्ज्वलायै नमः।
१८. ओं माङ्गल्याभरणैश्चित्रैर्मुक्ताहारै र्विभूषितायै नमः।
१९. ओं ताटङ्कैरवतंसैश्च शोभमानमुखाम्बुजायै नमः।
२०. ओं पद्महस्तायै नमः।
२१. ओं हरिवल्लभायै नमः।
२२. ओं ऋग्यजुस्सामरूपायै न्मः।
२३. ओं विद्यायै नमः।
२४. ओं अब्धिजायै नमः।

एवं चतुर्विंशततिनामभिः बिल्वपत्रैः लक्ष्म्यर्चनं कुर्यात्। तेन सर्वाभीष्ट सिद्धिर्भवति।

।।इति चुतर्विंशतिनामावळिः।।

तिरुमलतिरुपतिदेवस्थानानि





तिरुचानूरु श्रीपद्मावतीमातुः वार्षिकब्रह्मोत्सवः
2026 डिसेम्बर् 06 तः 14 पर्यन्तम्





05-12-2026 - **शनैश्चरवासरः**
प्रातः
लक्षकुङ्कुमार्चनम्



05-12-2026 - **शनैश्चरवासरः**
रात्रौ
सेनाधिपत्युत्सवः, अङ्कुरार्पणम्



06-12-2026 - **भानुवासरः**
प्रातः
ध्वजारोहणम्



06-12-2026 - **भानुवासरः**
रात्रौ
लघुशेषवाहनम्



07-12-2026 - **इन्दुवासरः**
प्रातः
महाशेषवाहनम्



07-12-2026 - **इन्दुवासरः**
रात्रौ
हंसवाहनम्



08-12-2026 - **भौम्यवासरः**
प्रातः
मौक्तिकमण्टपम्



08-12-2026 - **भौम्यवासरः**
रात्रौ
सिंहवाहनम्



09-12-2026 - **सौम्यवासरः**
प्रातः
कल्पवृक्षवाहनम्



09-12-2026 - **सौम्यवासरः**
रात्रौ
हनुमद्वाहनम्



10-12-2026 - **बृहस्पतिवासरः**
प्रातः
आन्दोलिकासेवा



10-12-2026 - **बृहस्पतिवासरः**
रात्रौ
गजवाहनम्



11-12-2026 - **भृगुवासरः**
प्रातः
सर्वभूपालवाहनम्



11-12-2026 - **भृगुवासरः**
रात्रौ
गरुडवाहनम्



12-12-2026 - **शनैश्चरवासरः**
प्रातः
सूर्यप्रभावाहनम्



12-12-2026 - **शनैश्चरवासरः**
रात्रौ
चन्द्रप्रभावाहनम्



13-12-2026 - **भानुवासरः**
प्रातः
रथोत्सवः



13-12-2026 - **भानुवासरः**
रात्रौ
अश्ववाहनम्



14-12-2026 - **इन्दुवासरः**
प्रातः
चक्रस्नानम्



14-12-2026 - **इन्दुवासरः**
रात्रौ
ध्वजावरोहणम्



15-12-2026 - **भौम्यवासरः**
प्रातः
पुष्पयागः



तिरुचानूरु श्रीपद्मावतीदेवी मन्दिरे 23.09.2026 दिनादारभ्य 26.09.2026 दिनपर्यन्तं शास्त्रोक्तरूपेण पवित्रमालासमर्पणोत्सवः अत्यन्तवैभवोपेततया प्रवृत्तः। अस्मिन् सन्दर्भे मूलमूर्ति, उत्सवमूर्ति, उपालयपरिवारदेवीदेवताः विमानप्रकारस्य ध्वजस्तम्भस्य च पवित्रमालाः समर्पयामासुः। अस्मिन् कार्यक्रमे ति.ति.देवस्थान संयुक्तकार्यनिर्वहणाधिकारी डा. ऐ.शरत् ऐ.ए.यस्., शासनसभ्यः श्री वी नानी मन्दिराधिकारिकगणश्च भागं गृहीतवन्तः।



24.09.2026 तिथौ तिरुमलक्षेत्रे ''भागसवारी उत्सवः'' अत्यन्तवैभवोपेततया सम्पन्नः। अस्मिन् कार्यक्रमे तिरुमल श्री श्री श्री महा जीयरुस्वामिनः श्री श्री श्री लघुजियरु स्वामिनः ति.ति.देवस्थानकार्यनिर्वहणाधिकारिणः श्री यम्. रविचन्द्रमहोदयाः ऐ.ए.यस्., महाशयाः देवालयाधिकारिकगणः भक्तजनाश्च भागं गृहीतवन्तः।



02.10.2026 दिने महात्मागान्धीजयन्तीदिनसन्दर्भे स्वच्छतान्तर्गत ति.ति. देवस्थान अप्पलायुगुण्ट - श्रीप्रसन्नवेङ्कटेश्वरस्वामिमन्दिरस्य प्रतिष्ठात्मक स्वच्छान्ध्र अवार्डु - 2026 तिरुपति तुडाकार्यालयप्राङ्गणे कच्छपी-आडिटोरियम् भवने जिल्लाकलेक्टरुमहोदयः अवार्डु कार्यालयाधीक्षकस्य पुरस्कारप्रदानं ददौ।



03.10.2026 तिथौ ति.ति.देवस्थानसम्बन्धिहिन्दूधर्मप्रचारपरिषत्, दाससाहित्यप्राजेक्ट् श्री अन्नमाचार्यप्राजेक्ट्, यस.वि.बि.सि. आध्वर्ये ति.ति.देवस्थानपरिपालनभवनप्राङ्गणात् अलिपिरिपादालमण्टपपर्यन्तं पिष्टदीपोत्सवशोभायात्रा अत्यन्तवैभवोपेततया सम्पन्ना। अस्मिन् कार्यक्रमे संयुक्तकार्यनिर्वहणादिकारी (विद्या-वैद्यम्) ति.ति. देवस्थानपालकमण्डलीसभ्याः, अत्युन्नताधिकारिणश्च भागं गृहीतवन्तः।



मनवालमहामुन्युत्सवाः (04.11.2026)

- डा. जि.चन्द्रशेखर् ,चरवाणी-९४९१७९४५०६

ति.ति.देवस्थानप्रकटितपर्वदिनान्यनुसृत्य नवम्बर्मासे ४ तिथ्यारभ्य मनवालमहामुन्यत्सवाः प्रभ्यन्ते। १३ तिथौ शात्तुमोराकार्यक्रमश्च प्रवर्तते।

पेरियपेरिमाल्लस्य अनुग्रहात् आदिशेषांशत्वेन आल्वारुमहोदयः तिरुनगर्यां जनिं लेभे। अस्य शिष्याः अष्टदिग्गजाः - पोन्नडिक्काल् जीयर्, कोयिलू अन्नन्, पतङ्गिपरवस्तु पट्टार्पिरानू जीयरु, तिरुवेङ्कटजीयर्, एरुम्बि अप्पा, प्रतिवादभयङ्कर अन्नन् अप्पल्लै अप्पल्लर् इति। अस्य नवरत्नाणि-सेनैमुदलियाण्डान् नायनार्, शठगोपदासर् (नालूरुशिरत्तान्) कन्दाडै पोरेरुनायन्। येट्टूरुसिङ्गराचार्यः, कन्दाडै अप्पन् कन्दाडै तिरुक्कोपुरत्तुनायनारु कन्दाडैनारनप्पै, कन्दाडै तोलप्परप्पै कन्दाडै अल्लेत्तु वाल्वित्तपेरुमाल् अन्ये तिरुवंशाः तिरुमालिगलु-दिव्यदेशशिष्याः।

अनेनरचिताः श्रीसूक्तयः - श्रीदेवराजमङ्गलम्, यतिराजविंशतिः, उपदेशरत्नमाला, तिरुवाय्यमोलिनूरन्दादि, आर्तिप्रबन्धः, व्याख्यानानि - मुमुकुपडि, तत्त्वत्रयम्, श्रीवचनभूषणम्, आचार्यहृदयः, पेरियाल्वारुतिरुमोलि (पेरियावाचान् पिल्लैव्याख्यनात् लुप्तभागः) रामानुज नूरन्दादि प्रमाणतिरट्टु (सर्वेषां श्लोकानां संग्रहत्वेन शास्त्र वाक्यानां मुख्यग्रन्थः) ईडु ३६०० पडि, ज्ञान सारः, प्रमेयसारः, तत्त्वत्रयम्, श्रीवचनभूषणमिति। अयं मणवालमहामुनिः तिरुनगर्यां तिगलकिडन्तान् तिरुणावीरुडयपिरान्-श्रीरङ्गनाच्चियारुदम्पत्याः आदिशेषावतारत्वेन जातत्वात् अलिगियमणवालमामुनुलु, सुन्दरजामातृमुनिः रम्यजामातृमुनिः,रम्यजामातृयोगी वरवरमुनिः यतीन्द्रप्रवणः, कान्तोपयन्त्राः, रामानुजन् पोन्नडि, सौम्यजामातृयोगीन्द्रः, कोयिल् शिल्वमणवालमामुनिः इत्यादि-तिरुनामानि सन्ति। अस्य पेरियजीयरु वेल्लैजीयरु, विप्रदवाक् शिखामणिः, पोयिल्लादमणवालमामुनिः इत्यादिबिरुदानि सन्ति।

१. विद्याभ्यासः - अयं पितृसन्निधौ मातामहीग्रामे शिक्किलूकिडारे सामान्यशास्त्रं वेदाभ्यासञ्चकार। विद्याभ्यासकाले एव अयं विवाहितः बभूव। तिरुवाय्योलिपिल्लै वैभवं श्रुत्वा

२. तिरुनगरीं गत्वा तदाश्रयं प्राप्तः

३. अयं स्वपुत्रस्य तिरुवय्योलिपिल्लै सूचनया यम्मैयत् इरामानुसन् इति नामकरणं चकार

४. तिरुवाय्योलिपिल्लै मरणानन्तरं दर्शन प्रवर्तकत्वेन बाध्यतां स्वीचकार।

५. अरुलिच्चैयल् ग्रन्थे (दिव्य प्रबन्धः) महाप्रावीण्यं सम्पादितवन्तः। तिरुवाय्यालौ ईडु ३६०० पडिव्याख्याने महाप्रावीण्ययुतः अयं ईडुख्यानाधारात् विद्यमानानि प्रमाणानि सम्पाद्य ग्रन्थीकरणं चकार।

६.अस्य मनवालमहामुनेः कीर्तिंश्रुत्वा वानमामैल अस्य प्रथमशिष्यः भूत्वा गुरुसेवार्थं सन्यासं स्वीचकार

७. गुरोरनुमत्या अस्मत्सम्प्रदायव्याप्तये श्रीरङ्गं जगाम।

८. श्रीरङ्गमार्गे विद्यमानश्रीविल्लिपुत्तरु आण्डाल् रङ्गमन्नारोः - तिरुमालिरुं जोलै अलगुरोः स्वमङ्गलाशासनं चकार।

९. श्रीरङ्गं गत्वा कावेरीनदीतीरे नित्यकर्मानुष्ठानं कृत्वा वैष्णवैः प्राप्तस्वागतः स्थानिकवैष्णव प्रोत्साहेन एम्मेरुमानारोः नम्माल्वारोः पेरियपिराट्टि इत्यादीनां मङ्गलाशासनं चकार।

आगामि सुखं वा दुःखं वा हृदयं समर्थी करोति।

१०. श्रीरङ्गस्थः अयं महम्मदीयदण्डयात्रानन्तरं नष्टग्रन्थान् पुनः सम्पादितवान्

११. तिरुमलयात्रायां तिरुक्कोनलूरु, तिरुक्कुडिगै दिव्यदेशानां मङ्गलाशासनं चकार। तिरुपतिपुण्यक्षेत्रं गत्वा गोविन्दराज नरसिंहस्वामिनः ततः तिरुमलस्थ वेङ्कटेश्वरस्वामिनः दर्शनं प्राप्य मङ्गलाशासनं चकार। ततः काञ्चीपुरं गत्वा तत्र देवस्य मङ्गलाशासनं चकार।

मणवालमहामुनिः - काञ्चीपुरम्

१२. पश्चादयं पेरम्बुदूर गत्वा एम्मारु मनारु अनुभवनिमग्नः मङ्गलाशासनं चकार।

१३. पश्चात् काञ्चीपुरमागत्य श्रीभाष्यं किडम्बिनायनास्समीपे चर्चितवान्। केचिद्वैष्णवाः केषुचिद्विषयेषु वादनार्थं आगताः स्वाचार्याः भगवद्विषयेषु ईडुबडमित्यादेशात् तानादौ निराकारं चकार। परन्तु तस्य अनुचरैः शान्तीकरणात् तेषां विवादानां समुचितं समाधानं ददौ। अतः वादनार्थमागताः मनवालमहामुनेः चरणद्वयं आश्रयितुं समुचितप्रयत्नं चक्रुः। मणवालमहामुनेः ज्ञानं ज्ञात्वा किडखिनायनारु आश्चर्यचकितः तस्य निजस्वरूपं वक्तुं अभ्यर्थयामास। तदा किडम्बिनायनारुमहाशयेन श्रीभाष्योपदेशात् आचार्यस्थाने विद्यमानत्वात् मणवालमुनिः स्वादिशेषस्वरूपं प्रदर्शयामास। तदा किडम्बिनायनार् आनन्दभरितः अस्मिन् भक्तिप्रपत्तिभिः व्यवहरतिस्म। ततः शठगोपजीयर् समीपे सन्न्यासाश्रमं स्वीचकार। पेरुमाल्महाशयः एनं सानन्दं स्वीकृत्य तिरुनाम्नाभवितुमादिदेश। मनवालमहामुनेः पल्लवरायमठं दत्वा तत्रैव वर्तितव्यमिति आज्ञां ददौ। उत्तमनम्बिशिष्याः सर्वे मठवालमहामुनिमठं गत्वा ससन्तोषं अयमेव अस्माकं गुरुरिति प्रशंसां चक्रुः।

२०. ततः मणवालमहामुनिः पोन्नडिक्कालजीयर् पर्यवेक्षणे मठपुनरुद्धरणं कर्तव्यमिति स्वशिष्यानादिदेश। ततः शिष्येभ्यः अभिमानिभ्यः प्रत्यहं ईडुप्रबन्धान् एम्मरुमानरुमहिमानं श्रीवचनभूषणदिव्यशास्त्रमधिकृत्य प्रवचनानि कथयतिस्म।

२७. केचित् दुष्टाः मनवालमहामुनेः कीर्तिप्रतिष्ठासु ईर्ष्यया तस्य मठं अग्निदाहं कर्तुं प्रयत्नानकुर्वन्। परन्तु महामुनिः सर्परूपं धृत्वा मठात्बहिरागत्य ततः मानवरूपं धृत्वा बहिःस्थ वैष्णवसमूहे अतिष्ठत्।तद्देशस्यराजा तान् शिक्षितुं निश्चयं चकार। परन्तु महामुनिः तेषां शिक्षा मास्तु इति कथनात् ते दुष्टाः महामुनेः शिष्याः अभवन्। राजापि तन्महिमानं दृष्ट्वा तस्मात् पञ्चसंस्कारानवाप। ततः अल्वरुनगरी, तिरुक्कुरुंगुडि दिव्य देशेषु बहूनि कैङ्कर्याणि चकार।

२८. मनवालमहामुनिः श्रीरङ्गं गत्वा यथाविधि कैङ्कर्याणि करोति स्म। एरुम्बिअप्पा एरुम्बिग्रामादागत्य महामुनेः माहात्म्यं ज्ञात्वा श्रीरङ्गे तदृर्शनं कृत्वा तस्य प्रसादं अस्वीकृत्य आगतः। एतत्कारणात् तिरुवादनपेरुमाल् सन्निधिद्वाराणि उदूघाटनाय प्रयत्ने कृते विफलं बभूव। अतः एरुम्बि अप्पा पश्चात्तप्तः पुनः श्रीरङ्गमागत्य महामुनिदर्शनं चकार। महामुनिः आदिशेषावतारः इति ज्ञात्वा श्रीरङ्गमागत्य आत्मानं समर्पितवान्। अयं दिनचर्येति अद्भुतं प्रबन्धं रचयामास, पेरुमाल् नन्देः दर्शनं दत्वा महामुनिं दर्शयन् अयमादिशेषावतारः इति कथनात् महामुनेः मठंगत्वा उत्तमनम्बी क्षमापनमुक्त्वा तस्मिन् भक्तिपरः आसीत्।

३१. वैष्णवमहिला काचित् महामुनौ अन्तरङ्गे एकान्ततया निद्रायां स्थिते सति कक्ष्यायां एकेन रङ्गेण दृष्ट्वा तं आदिशेषरूपं ददर्श। महामुनिः बाह्यशब्देभ्यः जागृतः तां दृष्ट्वा वृत्तान्तोऽयम् गुप्ततया स्थीयतामितितामवोचत्। मनवालमहामुनिः रहस्यग्रन्थानां व्यख्यानं कर्तुं आरभ्य आदौ मुमुकुपडि इत्यादि तत्त्वत्रयं, वचनभूषणस्य वेदवेदान्तेतिहास पुराणदिव्यप्रबन्धः इत्यादि ग्रन्थेभ्यः विशेषार्थाधारतया व्याख्यानं विरचयामास।

३३.तिरुवाम्मोलि व्याख्यनं तस्य प्रबन्धस्य अवतारक्रमं पिल्लेलोकाचार्यवतारविशेषं तस्य वचनभूषणं तिरुवम्मोलिसारार्थं श्रीवचनभूषणमिति निरूपकउपदेश रत्नमालां विरचय्य तदर्थविशेषान् विशदीचकार।

पेरुमाल् गरुडारूढः एनं आत्मना सह निनाय। एवं बहुलीलाः प्रदर्श्य बहुकैङ्कर्याणि चकार। आत्मानमधिकृत्य उत्सवाः न कर्तव्याः इति आदिदेश। विनयविधेयताकारुण्य युक्तः इति बहुभिः प्रस्तुतः अन्ते दिव्यपदं मोक्षमवाप।

''श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवं यतीन्द्रप्रवणं वन्दे रम्यजामातारं मुनिम्।''



नागचतुर्थी

नागुलचविति - 13.11.2026

- डा. वि.माधवरेड्डि, चरवाणी - ९९४८५२३२५९

कार्तीकशुद्धचतुथी आन्ध्रदेशे केषुचिद्भागेषु पर्वदिनं भवति। विशेषभागेषु श्रावणशुद्धपञ्चमी नागपञ्चमीति प्रसिद्धम्। नागपञ्चमी विषयोऽपिसुप्रसिद्ध एव। कार्तिक शुद्ध चतुर्थ्यां नागव्रतं कर्तव्यमिति चतुर्वर्गचिन्तामणौ प्रोक्तम्। अखिलभारते कदाचित् आचरणे आसीदिति ऊह्यते।

दीपावळी-अमावास्यानन्तरं कार्तिकशुद्धचतुर्थ्यां वल्मीकपूजां कुर्वन्ति। प्रकृतिः मानवजीवनाधारा। अतः प्रकृतिं दैवस्वरूपत्वेन सम्भाव्य पूर्वीकाः वृक्षान् वल्मीकानि शिलापर्वतनदीपर्वतादीन् समस्तप्राणिकोटिञ्च दैवस्वरूपत्वेन पश्यन्तः विशेषपूजाः आचरन्ति। तद्भागत्वेन नागसर्पं नागराजत्वेन नागदेवतात्वेन पूजयन्ति। एते सर्पाः भूम्यन्तर्भागे निवसन्तः भूसाररक्षकप्राणित्वेन विद्यमानत्वात् समस्तजीवकोटेः जलप्रदानदेवतात्वेन जनाः मन्वते। एते सस्यधान्यनाशक कृमिकीटादीन् भक्षयन्तः परोक्षत्वेन कृषीवलानां सस्यफलाभावं निवारयन्ति। एवं प्रकृतिपरत्वेन एते अस्माकं साहाय्यमाचरन्ति।

हिन्दूपुराणेषु नागचचुर्थीमधिकृत्य बह्व्यः गाथास्सन्ति। बहुषु देवालयेषु वलयाकारनागेन्द्रविग्रहाः दृश्यन्ते। एतन्नागचतुर्थ्यां नागेन्द्रं शिवभावेन अर्चनात् सर्वरोगदूराः भूत्वा सौभाग्यवन्तः भवेयुरिति भारतीयानां विश्वासः। एवंमानवशरीरवल्मीके नवरध्राः वर्तन्ते। एते एवनवरध्राः इति वदन्ति। मानवशरीरेनाडीपूरितपृष्टवशंवा मोरुदण्डं वेन्नुपामु इति वदन्ति। तत्रकुण्डलिनीशक्तिः मूलाधारचक्रे सर्पाकारे वर्तते इति योगशास्त्रवचनम्। अयं मानवशरीरे निद्रातीव नटन् कामक्रोधलोभमोह मदमात्सर्यविषान् वमन् मानवे सत्त्वगुणसम्पत्तिं हरन् वर्तते इति अतः नागचतुर्थीदिने प्रत्यक्षतया विषसर्पवल्मीकानि आराध्य वल्मीके क्षीर समर्पणात् मानवस्थविषसर्पोऽपि श्वेतत्वं प्राप्य सर्वहृदयनिवासिनः महाविष्णोः श्वेत - आदि शेषत्वेन परिणमय्य शेषशय्यात्वेन परिणामो भवतु इति कामेन क्रियमाणनागवल्मीके क्षीरसमर्पणान्तरार्थः इति वदन्ति।

नागचतुर्थीदिने गोक्षीरं वल्मीके समर्प्य नागपूजां कृत्वा तिलपिष्ट चलिमिडिरम्भाफलादीनि निवेदयन्ति। अस्मिन्सन्दर्भे वल्मीकसमीपे दीपावळिदिने मताबुकाकरपुष्पटपासुनाम कादीनि बालाः ससन्तोषं प्रज्वालयन्ति। बहुभारतीयगृहेषु गृहदेवः सुब्रह्मण्येश्वरः एव आराध्यदैवमिति पूजयन्ति। अतः तेषां नाम बहवः नागराजः फणिः, सुब्रह्मण्यमित्यादि नामानि स्वसन्ततिनामकरणं कुर्वन्ति। नागचतुर्थीमधिकृत्य, हिन्दूनां पर्वदिनेषु सुरवरं प्रतापरेड्डि एवं लिखति - ‘‘नागचतुर्थ्यां शीतलप्रवेशः, रथसप्तम्यां तापः, इति कथनात् कार्तिकमासे इदं पर्व आगच्छतीति कथयति। श्रावणमासे नागपञ्चमीनाम्ना शुद्धपञ्चमीम्याचरन्ति। नागानामाह्वानां विशेषसम्बन्धो वर्तते इति ज्ञायते। भारतदेशे नागाः बहुषु प्रदेशेषु आसन्नितिकथ्यते। अस्सांराष्ट्रदक्षिणभागे नागायूपर्वतेषु अद्यापि नागजातयः वर्तन्ते। ते अनागरिकाः। काश्मीरदेशे अनादिकालादारब्य नागाः वर्तन्ते इति गाथास्सन्ति। आन्ध्राः नागजातिसम्बन्धिनः इति केचित्। कृष्णानदीदक्षिणतीरे नागजातीयाः आसन्निति बौद्धग्रन्थेभ्यः ज्ञायते। वेश्यासमूहमपि नागवासः इति कथयन्ति। बौद्धधर्मे नागानामनुरक्तिः। नागाः बुद्धपरमभक्ताः, बौद्धवाङ्मये नागसम्बन्धिगाथाः वर्तन्ते। एलापत्रनागाः, मुचिलिन्दनागाः प्रसिद्धाः। दिक्पालकेभ्यः लोकपालकसम्बन्धोऽप्यासीदिति ज्ञायते। विरूपाक्षोनाम नागराजः प्राक्दिक्पालकः इति एलाव्रतपश्चिमदिक्पालकः इति बौद्धानां विश्वासः। अमरावतीनागार्जुन पर्वतबौद्धशिल्पेषु बहुप्रदेशेषु नागराजनागीनीनां नागानां चित्राणि सन्ति। शिल्पेषु प्राचीनान्ध्रशिल्पकारिणः नागान्

कटि प्रदेशादारभ्य उपरिभागं मनुष्यरूपे अधोभागे सर्परूपे शिलाप्रतिमासु चित्रीकृतवन्तः। नागराजचित्राणां शिरसि पञ्चफणाः दृश्यन्ते।

भारतदेशे नागपूजा अधिका। रक्षणार्थं नागप्रतिष्ठां कृत्वा आराधनमाचारे वर्तते। आन्ध्रविश्वकलापरिषच्चिह्नेपि नागमुद्रा वर्तते। नागरूपं चित्रीकृत्य नागमुखे क्षीरं निवेश्य चलिमिडि पिष्टमपि निवेशयन्ति। नागेश्वरमेवं प्रार्थयन्ति

''नन्नेलुनागन्न नाकुलमुनेलु
नाकन्नवारल, नायिंटिवारल
आप्तुलमित्रुलनन्दरनुनेलु
पडगतोक्किन, पगवाडनुकोकु
नडुमुतोक्किन नावाडननुकोनुमु
तोकतोक्किन तोलगुचु पोम्मु
इदिगो नूकनिच्चेदनु मूकनुनाकिम्मु
पिल्लमूकनु नाकिम्मु''

इति मधुरातिमधुरं आन्ध्रस्त्रियः गायन्ति। नागेश्वरप्रार्थनया वन्ध्याः न भवन्तीति प्रजाविश्वासः। नागाः भीतिदाः प्रीतिदाः अपि। स्वप्ने सर्पान् दृष्ट्वा ऐश्वर्यवन्तः आसन्निति कर्णे श्रवणदोषे मालिन्यपूरिते सर्पवालं कर्णे निक्षिप्य सर्पनमस्कारं कृत्वा परिष्कृतदोषाः सानन्दाः भवन्तीति विश्वासोऽप्यासीत्। जङ्गमाः नागानाराधयन्ति। नागाः स्वेष्टदैवतमिति शिवालङ्कारप्रियाः इति नागसर्पफणौ कृष्णपादरेखाः दृष्ट्वा नमस्कृत्य, आराधयन्ति स्म। मरणसमये गरलपानकरणात् पुनरुज्जीविताः अपि भवन्ति स्म। बालबालिकाः ''मल्लीवच्चे नागुलचविति इति चवितिं संस्मृत्य आह्वयन्ति। सहस्रफणैः आदिशेषः धर्मरक्षणार्थमेव अवततारेति नागलोकनागाः सर्वे स्वेच्छया भूमौ सञ्चरणाय पाताललोकात् आगताः इति अत एव नागार्चनम् प्रसिद्धं जातमिति एकस्मिन् ग्रन्थे विवृतम्।

दीपावळिपर्वदिनानन्तरं चतुर्थदिने नागचतुथी प्रायशः आगच्छति। अवश्यं नागचतुर्थ्यां स्त्रियः क्षीरं वल्मीके समर्प्य चलिमिडि नैवेद्यं ददति। कर्णाक्षिबाधितानां नागचतुर्थ्यामुपवासः समुचितः। केचित् वल्मीके क्षीरसमर्पणानन्तरं वल्मीकमृत्तिकां किञ्चित् स्वीकृत्य कर्णे निक्षिपन्ति। तांमृत्तिकां वल्मीकसुवर्णमिति वदन्ति। नागवस्त्राणि वल्मीकोपरि निक्षिप्य पुनरपनीय धारणात् मनोरथं सम्पूर्यते इति लोकविश्वासः। नागवरं, नागुलापल्ली, सर्पवरं, नागमल्ली-ओषधयः, नागवर्तिकाभरणानि देवतागृहबाह्य प्रदेशेषु नागाभरणानि आन्ध्राणां नागसम्बन्धं, द्योतयन्ति। पञ्चमाः शूद्राः इदं पर्व आचरन्ति। नागचतुर्थ्यां वृश्चिकाः तालवृक्षादवरुह्य भूरन्ध्रेषु प्रविशन्तीति कथयन्ति। सन्तानस्य सर्पपूजायाः सम्बन्धः सुप्रसिद्धः एव।

ब्रह्मपुराणेकथा एवं वर्तते - शूरसेननामकचन्द्रवंशस्य राजा भार्यासहितः सन्तानार्थं बहुकालपर्यन्तं तपः आचचार। तत्फलतया तयोः सर्पः अजायत। तौ तमेव सर्पं पोषयतः स्म। सर्पस्य तस्य मानवभाषाप्यगता। सर्पे उपनयनकरणाय अभ्यर्थिते तथैव चक्रतुः। ततः सः सर्पः तस्य विवाहंकर्तुम पृच्छत्। खड्गंप्रेषयित्वा राजपुत्रिकया विवाहं चक्रतुः। सा भर्तुगृहं गत्वा आत्मना परिणीतः सर्पः इति ज्ञातासीत्। सा भर्त्रा सर्पेण भाषमाना दुःखेन विना ससन्तोषं कालं यापयति स्म। सर्पः भर्ता किमर्थं मां दृष्ट्वा न बिभेषीत्यपृच्छत् तां भार्यां मनुष्यरूपिणीम्। भर्ता यः कोऽपि स्त्रियः दैवसमः इति दैवसमभर्तृदर्शनात् भीतिः कुत्रः इति सा समादधौ। तदा सः सर्पः शिवशापात् सर्पः अभवमिति तया सह गौतमीनद्यां स्नानमाचर्य शापमोक्षमवाप। सर्पगेयमप्येवं आन्ध्रभाषायां वर्तते -

''देवडिगुल्लोनु देवुडोडेनि देवेन्द्रसभलोन जूदमाडेनि
परमेश्वरूडिगुल्लोनु पामुलाडेनि पणतिनानट्टिंट बाललाडेनि।''

सर्पफणछायातःगोपालकाः प्रभवः सञ्जाताः इति कथाः अपि सन्ति। ''सर्वायि पापडुकथा'' एतस्य एकं निदर्शनम्। गोपालेषु निद्रापरवशेषु द्वादशफणियुतसर्पः आगत्य फणानुत्थाप्यच्छत्रि यवत् रक्षयामास। पश्चात् तस्य राजभोगः लब्धः। तिम्मरसु-अमात्यमधिकृत्यापि एतादृशकथा वर्तते। बरोडाडवेजरुजमुनाबाय्याः सन्ततिर्नासीत्। एकस्य गोपालकस्य सर्पछायालब्धेति ततः श्रुत्वा तं बालं आत्मनः अनन्तराधिकारिणञ्चकार। स एव सुप्रसिद्ध सरूसयाजीरानुगैक्कारु। भारतदेशे ग्रामाणां पट्टणानां बाह्यप्रदेशेसरन्ध्रवल्मीकानि अद्यापि स्त्रीभिः पूज्यमानाः दृश्यन्ते। आदिशेषः सर्पः एव विष्णोः शय्यभूत्वा तं सेवते। शिवः सर्पालङ्कारः। वासुकिः अमृतप्राप्तये देवदानवैः क्षीरोदधिमन्थनाय रज्जुत्वादेवामृतप्राप्तये उपकृतः। लोकेषु मानवानामिव नागलोकोऽप्येकः वर्तते इति पुराणेषु वर्णितः। नागलोकवासिनः नागाः महाद्भुतप्रभावशालिनः इति इष्टानुसारं सर्पाः मानवशरीरधारिणश्च भवन्तिति पुराणगाथा। ज्योतिष्कैः भारते सर्वासु मासपत्रिकासु अवश्यं वर्षे वर्षे नागुलचवितिपर्वदिनं निर्दिश्यते। एतदेव नागुलचवितिपर्वदिनप्रामुख्यस्य प्रबलं प्रमाणम्।

अत्रिमहर्षिः वर्षतिरुनक्षत्रम्

- डा.के.कोटेश्वरय्य - चरवाणी - ९९८५१२३२६२

(गतअक्टोबर् मासे १६ पुटात्)

अत्रिमहर्षिणा सीतारामयोः आतिथ्यम् - श्रीरामपादुकौ गृहीत्वा भरतस्य वनात् नन्दिग्रामगमनानन्तरं श्रीरामः भार्यानुजसहितः अत्रिमहर्षेराश्रमं जगाम। अत्रिमहर्षिः तान् सम्मान्य अनसूयादेवीमाहात्म्यं तेषां ज्ञापयामास। सीतादेवी अनसूयातः पातिव्रत्यधर्मान् श्रुत्वा तस्याः स्वविहावृत्तान्तं सर्वमवोचत्। अनसूया सीतायै नूतनाम्बरभूषणैः सह शश्वदलङ्कृतियुतं कुङ्कुममपि दत्वा आशीर्ददौ। तस्यां रात्रौ सीतारामलक्ष्मणाः अत्र्याश्रमे कालं यापयित्वा प्रातः वनं जग्मुः।

अत्रिमहर्षिणा अपरिग्रहव्रतपालनम् - अत्रिमहर्षिः कश्यपविश्वामित्रादिभिः सह भूमौ सञ्चरन् तपश्चरणतत्परः आसीत्। ततः कदाचित् महाक्षामे प्रवृत्ते प्रतिग्रहदूराः सप्तर्षयः कलेबरमेकं भोक्तुं प्रारेभिरे। तदा वृषदर्भमहाराजप्रेषितभोजनपदार्थानपि तिरश्चक्रुः। ततः बिसतन्तूनानीय भोक्तुं तीरे आनीतान् बिसतन्तून् बद्धवा जले स्नानार्थं जग्मुः। देवेन्द्रः प्रच्छन्नवेषे आगत्यतानपहृत्य जगाम। सप्तर्षयः अपहर्तुदोषान् उच्चरन्ति स्म। ततः भीतः इन्द्रः अपरिग्रह व्रतपालनतपःप्रधानजीविते आश्चर्यचकितः स्वस्वरूपं धृत्वा सप्तर्षीन् अत्रिमहर्षिञ्च स्वलोकं नीत्वा सम्पूज्य कृतार्थो बभूव। (रामायणम्, भारते आनुशासनिकपर्व)

अत्रिसंहिता - कदाचिदृषयः अत्रिं उत्तमदैवं, परमधर्मं परमविधिं परमेश्वरार्चनविधानं पप्रच्छुः। अत्रिः तत्प्रश्नसन्तुष्टः एवमुवाच -



श्रीमन्नारायणः उत्तमोत्तमदैवम्
परन्धाम परंज्योतिः, सर्वकारणकारणः,
उपवासव्रतदानस्वाध्यायादिभिः तदर्चनमेव परमधर्मः परमविधिः। इहपरसुखार्थं तदर्चनं अमूर्ताचनं समूर्ताचनमिति द्विविधम्। अग्नयाहुतिः अमूर्तार्चनम् प्रतिमाद्यर्चनम् समूर्तार्चनम्। वैखानसमतानुसृत - समूर्तार्चनमेव श्रेष्ठम्। गृहे वा देवालये वा वेलात्रये द्विजैः भक्तिभावेन होमान्तत्वेन परमेश्वरप्रतिमापूजा श्रेष्ठा। अहं भृगुकश्यपमरीचिमहर्षयश्च समूर्तार्चनमभिनन्दामः इत्यामूलाग्रं अत्रिसहितां तेभ्यः उपदिदेश।

अत्रिमहर्षिणा कर्म, प्रतिष्ठा, पूजन, स्नपन प्रायश्चित्तविभगेषु संहितायां विभक्ताः। १.देवालय स्थलपरिशीलनम्. देवायतनरूपम्, दैवप्रतिमानिरूपणम्, इत्यादिविषयाः प्रथमभागस्थाः। द्वितीयभागे प्रधान परिवारदेवता प्रतिष्ठदिकम्, तृतीयभागे पूजाविधानम् चतुर्थभागे महाभिषेकः, पञ्चमभागे उत्सव विशेषाः, प्रत्येकोत्सवनिबन्धनानि षष्ठभागे पूर्वोक्तविधाने दोषादिकस्य प्रायश्चित्तविधानमित्येते अंशाः विवृताः। एवमत्रिमहर्षिः लोकाय परमेश्वरोपसनातन्मूल-तरणोपायांश्च ददौ।

अत्रिस्मृतिः - आत्रेयधर्मशास्त्रे शूद्रस्त्रीविवाहात् विप्रः पतितोभवेत्। (१११-१६) अत्र नवाध्यायेषु दान धर्मजपतप रहस्यप्रायश्चित्तयोगयोगाङ्गदि विषयाः उट्टङ्किताः। बहुषु अत्रिस्मृतिग्रन्थाः बहवः सन्ति। तेषु प्रायश्चित्त दान पितृमेध आचार-गुरुप्रशंसा, चतुर्वर्ण्य धर्म - जपमालापवित्रता, ब्राह्मण शौचानसूयादिसुगुणाः, इष्टापूर्तयमनियम पुत्र - दत्तपुत्र प्रायश्चित - अशौच चान्द्रायाण कृच्छ्रशान्तिवचनादि विषयास्सन्ति। अत्रिकृतदत्तकमीमांसायां अन्त्यजाः रजकपादरक्षाकारिणः नटाः बुरुदाः, कैवर्तकाः (ग्रामीणाः) भिल्लाः, वेणु परिकरनिर्मातारः इति सप्तधा विभक्ताः। यात्राविवाहायज्ञादिषु अस्पृश्यदोषः नास्ति। लघ्वत्रिस्मृतिः। वृद्धात्रेयस्मृतिरिति स्मृतिद्वयं अत्रिनाम्ना प्रसिद्धं दृश्यते।

''अत्रिमहर्षिये नमः''

चित्रकथा

कलिबाधानिवारणार्थम्

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

















आत्मानं सततं रक्षेत् दारैरपि धनैरपि।


त्वया दश इत्युक्तम्। दश शब्दस्य दशसंख्या इति विषघातं कुरु इति अर्थद्वयं वर्तते। अत एव त्वयोक्तप्रकारं त्वां दशनं कृतोऽस्मि।
अद्य मम विषः तव शरीरे वर्तते। तव एतद्रूपं कालं जातम्। अद्य त्वां न कोऽपि ज्ञास्यति। किञ्चित्कालानन्तरं त्वं मां स्मर। मम विषः शरीरात् बहिर्गमिष्यति। तव तदा पूर्वरूप मागमिष्यति। तावत्पर्यन्तं बाहुकनाम्ना ऋतुपर्णमहाराजासस्थाने रथचालकत्वेन उद्योगं कर्म कुरु।
बाहुक! दमयन्त्याः द्वितीयवारं स्वयंवरसमावेशः भविष्यति। झटिति तत्र गन्तव्यम्।
राजमन्दिरे स्वापत्य-दर्शनात् नलः दुःखीभूतः आसीत्।
एतावता दमयन्ती आगत्य...
स्वामिन्! त्वामानेतुमेव इयं स्वयंवरालोचना।
नागराजन्! मम पूर्वरूपं प्रसादय।
कर्कोटकानुग्रहात् नलस्य पूर्वरूपमागतम्।
अत एव कर्कोटकसर्प नाम स्मरणात् सदा अरिष्टानि, कष्टानि नश्युः।
'कर्कोटकस्य नागस्य दमयन्त्याः नलस्य च ऋतुपर्णस्य राजर्षेः स्मरणं पापनाशनम्।'
सर्वे जनास्सुखिनो भवन्तु।

नवम्बर् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





१.मेषराशिः - अधिकधनव्ययः, चिन्तितमनोरथसिद्धिः, दूरसञ्चारः, आध्यात्मिकचिन्तनं, दैवदर्शनं, उल्लासः, वैराग्यं, स्त्रीद्वारा धनलाभः, तदा तदा मनोभीतिः, उद्वेगः, अकालभोजनं, विद्या-उद्योग-व्यापारेषु मिश्रमफलं सम्भविष्यन्ति। लक्ष्मी पूजा कर्तव्या।



२.वृषभराशिः - भ्रातृलाभः, वाहनसौख्यं, ज्ञानसाधनेच्छा, उद्योगपरिवर्तनं, अधिकारजनप्रशंसाः, तीर्थयात्रालाभः, सन्तानलाभः, धनागमनं सम्भवन्ति। शिवाराधनं कर्तव्यम्।



३. मिथुनराशिः - वाक्पारुष्यं, स्वल्पविवादाः, अधिककोपः, वाहनलाभः, अनूह्यधनागमनं, अधिकारप्राप्तिः, विद्या-उद्योग-व्यापारेषु लाभः, अधिकारजनप्रशंसाः, दूरदेशगमन द्वारा बन्धुमित्रसमागमः भविष्यन्ति। लक्ष्मीपूजा कर्तव्या।



४.ककर्टकराशि : - तदा तदा ज्वरपीडा,वाक्पारूष्यं, मनोबाधा, शान्तगुणः, दूरप्रयाणानि, धनलाभः, ग्रन्थपठनं, आलयदर्शनं, तीर्थयात्रालाभः, विद्या-उद्योग-व्यापारकर्मसु मिश्रमफलानि, अधिकारजनद्वारा निन्दोद्वेगौ सम्भवन्ति। शिवाराधनं कर्तव्यम्।



५. सिंहराशिः - देशसंचारः, अनूह्यधनलाभः, भ्रातृलाभः, तदा तदा ज्वरपीडा, विद्या-उद्योग-व्यापारकर्मसु मिश्रमफलानि, शरीरकष्टानि सम्भवन्त्यपि आनन्दः, उत्साहः, चिन्तितकार्यसिद्धिः, कीर्तिः, पितृद्वारा लाभः भविष्यन्ति। नवग्रहाराधनं करणीयम्।



६. कन्याराशिः - उत्साहः, वर्धनं, वाक् सौमनस्यं, तीर्थयात्रालाभः, अधिकारजनप्रशंसाः, भूलाभः, शुभकार्यनिर्वाहणं, सद्वचयः विद्या-व्यापारकर्मसु लाभः, चिन्तितकार्यजयः, बन्धुमित्रसमागमः भविष्यन्ति। श्रीसुब्रह्मण्यस्वाम्याराधनं कर्तव्यम्।



७. तुलाराशिः - उद्वेगः, दुःखस्वप्नविचारः, स्त्रीजनद्वारा तदा तदा विवादाः, अधिकधनव्ययः, मनोभीतिः, उत्साहः, आरोग्यं, विद्या-उद्योग-व्यापारकर्मसु लाभः, चिन्तितकार्यसाधन, बन्धुमित्रसमागमः, अधिकारजनप्रसंसाः सम्भविष्यन्ति। लक्ष्मीपूजनं कर्तव्यम्।



८. वृश्चिकराशिः - वृथाविवादाः, आत्मन्यूनता,मनोभीतिः, अधिकधनव्ययः, सम्भवन्त्यपि उद्योगपरिवर्तनं, अनूह्यधनलाभः , बन्धुमित्रसमागमः, विद्या-उद्योग- व्यापार कर्मसु मिश्रमफलानि, वाहनयोगः, अधिकारजनप्रशंसाः सम्भविष्यन्ति। श्रीमहाविष्णोः पूजनं कर्तव्यम्।



९. धनूराशिः - सर्वत्र लाभः, धनागमनं, कीर्तिः विद्या-उद्योग-व्यापारकर्मसु जयः, बन्धुमित्रसमागमः, शुभकार्यपरंपरा, तीर्थयात्राः, दैवदर्शनं, सत्कार्याचरणं सम्भविष्यन्ति। तदा तदा ज्वरपीडासम्भवन्ति। श्रीसुब्रह्मण्यस्वम्याराधनं कर्तव्यम्।



१०. मकरराशिः - भाग्यलाभः, अनूह्यधनगमनं, अधिकारजनप्रशंसालाभः, उद्योगपरिवर्तनं, विद्या-उद्योग-व्यापारेषु शुभफलानि सम्भविष्यन्ति। दैवदर्शनं, तीर्थयात्राः, बन्धुमित्रसमागमः, तदा तदा ज्वरपीडा शरीर कष्टश्च सम्भवन्ति। शिवाराधनं करणीयम्।



११. कुम्भराशिः - वैराग्यभावना, भाग्यसिद्धिः, पितृद्वाराभाग्यलाभः, कुटुम्बाभिवृद्धिः, सत्कार्यचरणद्वारा धनव्ययः, विद्या-उद्योग-व्यापारकर्मसु मिश्रमफलानि, अधिकारजनद्वारा निन्दा, शरीरशोषणं सम्भवन्ति। शिवाराधनं कर्तव्यम्।



१२. मीनराशिः - अधिकधनव्ययः, भाग्यलाभः, शुभाशुभमिश्रमफलानि, सन्तोषः, शरीरशोषणं, विद्या-उद्योग-व्यापारकर्मसु शुभफलानि, उद्योगपरिवर्तनं दूरदेशगमनं सम्भविष्यन्ति। श्रीमहाविष्णोः पूजा आचरणीया।

आर्जवं हि कुटिलेषु ननीतिः।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.








अस्मिन् वार्षिकब्रह्मोत्सवसन्दर्भे तिरुमलमाडवीथीषु वाहनसेवापुरतः स्वनृत्य-प्रदर्शनं कर्तुं भारतदेशसर्वमूलप्रान्तेभ्यः आगताः बालाः, नृत्यबृन्दाः विविधकलाकाराबृन्दाः अपि अस्मिन्नुत्सवे भागं स्वीकृत्य स्वाद्भुतप्रदर्शनं प्रदर्शयामासुः। जीयङ्गारु, वेदपण्डिताः, आधिकारिकगणः, श्रीवारिसेवकाः, भक्तगणादयः अपि अधिकसंख्यायां भागं गृहीत्वा इमं ब्रह्मोत्सवं जयप्रदं चक्रुः।






SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY Published by Tirumala Tirupati Devasthanams Printing on 25-10-2026 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal Regd. No. TRP/154/2024-2026
"LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



नमामि नारायणपादपङ्कजम्। करोमि नारायणपूजनं सदा।
वदामि नारायणनामनिर्मलम्। स्मरामि नारायण तत्त्वमव्ययम्।।